**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 5
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# जयन्तभासर्वज्ञयोः पदार्थनिरूपणवैशिष्ट्यम्

**डॉ. कुञ्जविहारी द्विवेदी**
सहायक–आचार्यः, न्यायवैशेषिकः, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी।

**Article Info**

Accepted : 05 Oct 2024
Published : 30 Oct 2024
**Publication Issue :**
September-October -2024
Volume 7, Issue 5
**Page Number :** 55-59

**शोधसारांशः-** कश्मीरक्षेत्रे पुराकाले बहवः नैयायिकाः अभूवन् तेषु जयन्तभट्टस्य भासर्वज्ञस्य च कृतिः उपलब्धा जाता उभौ अपि पाशुपतशैवमार्गानुयायिनौ स्तः भासर्वज्ञः पाशुपतमतं स्वीकरोति। जयन्तभट्टश्च शैवः परन्तु फलतः शिवभक्तौ एव उभौ तयोः ग्रन्थौ प्राचीनन्याये मणीव राजेते न्यायमंजरी न्यायभूषणग्रन्थद्वयस्य वैशिष्ट्यमत्र प्रतिपादितं वर्तते।

**मुख्यशब्दाः-** जयन्तभट्टः, भासर्वज्ञः, क्रियायोगः, न्यामोहः, सृष्टिः।

नाविदितं सर्वेषां धीधनानां विदुषां यत्संस्कृतसाहित्यभण्डारे दर्शनानि खल्वतीव महनीयं पदमलंकुर्वन्ति इति। तत्रापि षड्दर्शनानामलंकारभूतम् अक्षपादप्रणीतं शास्त्रं न्यायदर्शनं सर्वविद्यानां प्रदीपरूपेण वरीवर्त्ति। अस्य न्यायशास्त्रस्य धारा अनादिकालादेव अनवच्छिन्नप्रवाहरूपेण प्रवहन्ती आस्ते। किन्तु कालान्तरेणसा धारा द्वेधां विभक्तेति वक्तुं शक्यते। प्रथमा धारा प्राचीनन्यायस्य अस्ति द्वितीया च पुनः गंगेशोपाध्यायप्रवर्त्तिता नव्यन्यायपदात्मिका चेति अस्यैवधाराद्वयस्य मध्ये महान्तौ युगप्रवर्तकौद्वौ नैयायिकौ अभूताम् भावर्सज्ञजयन्तभट्टौ इति। भासर्वज्ञेन न्यायवैशेषिकविषये महान् कृतः यत् कियन्त पदार्थाः स्वीकर्तव्याः कियन्तश्च निराकर्तव्या इति कस्य पदार्थस्य च कि वास्तविकं स्वरूपम् तस्य ग्रन्थे स्वविचारस्वातन्त्र्यं पदार्थविषये स्पष्टतया दरीदृश्यते। "तातस्य कूपोऽयमिति ब्रुवाणाः खारं जलं कापुरूषा प्रिबन्ति'' इति नीतिमवलम्व्यमानः पूर्वाचार्योक्तमतमपि यदि युक्तिहीनं प्रतिभाति तदपि खण्डयति नहि सः आचार्यः इत्येतावन्मात्रेणैव तद्वचः प्रमाणमिति अत एव स्वयमेव वक्तिनखलु वै सूत्रकारनियोगभयात् पदार्थाः स्वधर्मं हातुमर्हन्ति। यदि चाविचारितं सूत्रकारवचः प्रमाणम् परीक्षासूत्राणां तर्हि वैयर्थ्यं स्यात् इति।[1] तस्य ग्रन्थवैशिष्ट्यविषये किमधिकं वक्तव्यं यत्र वल्लभाचार्यो इति लीलावत्यां भूषणसरेणिटेवानुसृतेति। राजशेखरसूरिः जैनः लिखति यत्–

**भासर्वज्ञो न्यायसारतर्कसूत्रविधायकः।**

**न्यायभूषणनाम्नी तु टीका तासु प्रसिद्धिभाक्।।[2] इति**

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

भासर्वज्ञस्य भावसर्वज्ञ इत्यपि शुभाभिधानं श्रूयते। यद्यपि भासर्वज्ञप्रणीतेषु ग्रन्थेषु न कुत्रापि स्पष्टोल्लेखः तथापि काश्मीरदेशीयसर्वज्ञमित्रवद् भासर्वज्ञोऽपि स्वजन्मना काश्मीरदेशमेवालंचकारेतिसर्वसम्मतिः।

अस्य कालः दशमशतकस्प पूर्वार्धभाग इति स्वीक्रियते यत उदयनाचार्येण चर्चितस्य ज्ञानश्रीमित्रस्य ग्रन्थे नामतो भासर्वज्ञः उल्लिखितः। अतः ज्ञानश्रीमित्रात्प्राक्तनीयोऽयं भासर्वज्ञः। भासर्वज्ञस्य पाण्डित्यविषये केवलमनेनैवालं यद्भासर्वज्ञः, आचार्यः परमाचार्यतार्किकसार्वभौम, शास्त्रकारचक्रवर्त्तिसूत्रकार, वार्त्तिककार, भूषणकार,न्यायभूषणकार, न्यायालंकरण, पाशुपताचार्य, न्यायसार तर्कसूत्रविधायकं संग्रहवार्तिककारप्रभृतिसम्मानसूचकैः पदैः न्यायसारटीकारैः तदन्यैश्च तार्किकैः समादृतः।

तत्र अष्टादशटीकानां सत्त्वेऽपि न्यायसारे अनुसन्धानमपेक्षितमस्ति। अथात्र भासर्वज्ञस्य ग्रन्थवैशिष्ट्यविचारः स्थालीपुलाकन्यायेन प्रस्तूयते। प्रचलितन्यायमतेभ्यः तस्य पृथगेवमतानि सन्ति। भासर्वज्ञः न केवलं बौद्धमतमेव खण्डयित अपितु सगोत्रानपि सूत्रकारान् महर्षिगणान् विगणयितुं न करूणायते तथापि स्वसिद्धान्तं युक्तियुक्तमेवमनुते। न्यायभूषणे स लिखिति ''न खलु वै सूत्रकार नियोगभयात् पदार्थाः स्वधर्मंहातुमर्हन्ति।''[3]

यद्यपि न्यायवैशेषिकं समानतन्त्रत्वेनापि परिगणितं शास्त्रकारैस्तथापि भासर्वज्ञः लिखति न्यायशास्त्रं च व्याख्यातुं प्रवृत्तास्तेन अस्माकं वैशेषिकतन्त्रेण विरोधो न दोषाय।[4] अतः बहुत्र वैशेषिकमतान्यपि भासर्वज्ञेन खण्डितानि। अतएव उदयनाचार्यवल्लभप्रभृतिभिः भूषणकारः मुहुर्मुहुः अभिशप्तः। वैशेषिकदर्शनाचार्यः श्रीवल्लभाचार्यः लिखति तदिदं चिरन्तन वैशेषिकमतदूषणं भूषणकारस्यातित्रपाकरम्।[5] तदियमनाम्नातता भासर्वज्ञस्य यदिदमाचार्यमपि अवमन्यते।

किन्तु बौद्धानां मतखण्डने कुठार इव वर्तते भासर्वज्ञः। न्यायशास्त्रस्य प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[6] इति सूत्रं तिरस्कृत्य भासर्वज्ञः न्यायसारे लिखति प्रत्यक्षानुमानागमाः इति उपमानप्रमाणं पृथक्तया न स्वीकृत्य तस्य शब्दे एव अन्तर्भावो विहितः। गोसदृशो गवय इति वाक्यमेव संज्ञासंज्ञिसम्बन्धप्रतिपत्तिफलकमुपमानप्रमाणमपि शब्देऽन्तर्भूतमिति व्यवस्थापयति।

प्रत्यक्षप्रमाणव्याख्यानावसरे भासर्वज्ञः न केवलं लौकिकप्रत्यक्षं स्वीकरोति। तेन हि न्यायसारे प्रतिपादितम्। तत्र सम्यगपरोक्षानुभवसाधनं प्रत्यक्षम्।[7] तदिद्द्विविधम् योगिप्रत्यक्षमयोगिप्रत्यक्षंचेति[8] तत्रायोगिप्रत्यक्षं प्रकाशदेशकालधर्माद्यनुग्रहादिन्द्रियार्थसम्बन्ध–विशेषणस्थूलार्थग्राहकम्। योगिप्रत्यक्षस्य पृथक्तया नैव चर्चा दृश्यते।

मोक्षस्वरूविचारेऽपि भासर्वज्ञः प्रचलितन्यायशास्त्रमतात्पृथगेव मतं समुपस्थापयति। न्यायसूत्रग्रन्थे–'बाधनालक्षणं दुःखं'[9] 'तदत्यन्तविमोक्षोऽपवर्गः'[10]इति सूत्रद्वयं मोक्षस्वरूपं स्पष्टीकरोति। अर्थात् दुःखस्य आत्यन्तिकीनिवृत्तिरेवमोक्ष इति सुखं दुःखानुषक्तमेवेति दुःखस्यात्यन्तनिवृत्तौ सुखमपि निवर्तते एवेति मुक्तस्य न सुखमिति स्वीकुर्वन्ति नैयायिकाः। भासर्वज्ञस्तु दुःखात्यन्ताभावरूपा मोक्षावस्था मोहावस्था इव भवति। अतः न कोऽपि मोहावस्थां प्राप्तुं प्रवृत्ता भवेत्–

**दुःखाभावो हि नावेद्यः पुरुषार्थतयेष्यते।**

**नहि मूर्च्छाद्यवस्थार्थं प्रवृत्तो दृश्यते सुधीः।।**[11]

अत एव मोक्षस्वरूपविषये भासर्वज्ञः कथयति नित्यसंवेद्यमानसुखेन विशिष्टात्यन्तिकी दुःखनिवृत्तिः पुरूषस्य मोक्ष इति तथा च–

**सुखमात्यन्तिकं यत्र बुद्धिग्राह्यमतीन्द्रियम्।**

**तं वै मोक्षं विजानीयात् दुष्प्रापमकृतात्मभिः।।**[12]

एवञ्च–

**''आनन्दं ब्रह्मणो रूपं तच्च मोक्षेऽभिव्यज्यते।''**

एवञ्च–

**दुःखाभावमात्रे न सुखव्यवहारः**

अत एव मोक्षे नित्यसुखस्याभिव्यक्तिर्भवतीति भासर्वज्ञस्यः मतं न्यायभूषणेऽपि एवमेवाभिहितम्–मुक्तौ ज्ञानाभावाभ्युपगमेंमोहावस्थातो न तस्या विशेष इति प्रेक्षावतां तदर्थंप्रवृत्त्यनुपपत्तिः।

तदुक्तम्– **दुःखहानाय नो युक्ता सुखदुःखात्मकं परम्।**

**नहि कश्चित्पदार्थज्ञो मोहसिद्धौ प्रवर्तते।।**

**वरं वृन्दावनेऽरण्ये श्रृगालत्वं वृणोम्यहम्।**

**न तु निर्विषयं मोक्षं गौतमोगन्तुमिच्छति।।**[13]

परन्तु अत्र मम विचारः मुक्तौ नित्यसुखसंवेदनं न भवतीति कुत्रापि सूत्रकारेण कण्ठरवेण नैव अभिहितम्। वैशेषिकशास्त्रप्रभावान्न्यायशास्त्रेऽपि नभोवदवस्था इव मोक्षावस्था परवर्त्तिकाले भाष्यादौ स्वीकृता किन्तु वस्तुतः चरणाक्षस्य मते मोक्षेऽपि नित्यसुखसंवेदनमासीत् तथा च प्राचीनाकारिका–

**अत्यन्तनाशे गुणसङ्गतेर्या स्थितिर्नभोवत् कणभक्षपक्षे।**

**मुक्तिस्त्वदीये चरणाक्षपक्षे सानन्दसंवित्सहिता विमुक्तिः।।**

अत एव भासर्वज्ञस्य मतंयुक्तियुक्तमेव प्रतिभाति। भासर्वज्ञः मोक्षप्राप्त्यर्थं क्रियायोगस्य उल्लेखं करोति 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोगः' इत्युक्त्वा क्लेशमपाकर्तुमपेक्षितोऽयमिति वदति। इतः परं जयन्तभट्टमवलम्ब किञ्चिद्ब्रवीमि।

न्यायदर्शनप्रकाशकेषु ग्रन्थेषुप्रधानं स्थानं भजते न्यायमञ्जरी। गौतमवात्स्यायनोद्योतकरैतत्रितयाचार्यानन्तरं जयन्तभट्टस्यैव न्यायशास्त्रे प्रमुखं स्थानमस्ति अयञ्च जरन्नैयायिकः इतिपदेनाभिलप्यते गङ्गेशोपाध्यायश्च एतं जरन्नैयायिक इति नाम्ना उद्ध्रियते। 'रूचिरां न्यायमञ्जरीं प्रसवित्रे गुरवे नमः'[14]इति वाचस्पतिमिश्रैः स्वकृतन्यायकणिकायामादौ मङ्गलश्लोकेषु पाठात् तेषामेव गुरवः जयन्तभट्टाः इति प्रतिभाति परन्तु वैमत्यवशात् निश्चेतुं न शक्यते। भासर्वज्ञजयन्तमट्टयोः मध्ये कः पूर्ववर्त्ती कश्च पश्चाद्वर्त्ती इति इदानीमपि तमस्सु विद्यते। परन्तु

उभयोरपि आचार्ययोः वैशिष्टयं परस्परं अतिशायि इति न तिरोहितं विदुषाम्। यदि भासर्वज्ञः तर्कबलेन पदार्थस्वरूपं निर्धारयति तर्हि जयन्तभट्टः तर्कबलेन न्यायसिद्धपदार्थान् दृढतरयुक्त्या प्राचीनमतं च प्रतिपादयति। उभौ अपि काश्मीरदेशीयौ स्तः।वार्तिककारानन्तरमुभयोरपि आचार्ययोः प्रमुखं स्थानं न्यायदर्शने। न्यायमञ्जर्याः अध्ययनादिदं स्पष्टतया वक्तुं न प्रभवामि यत् जयन्तभट्टेन भासर्वज्ञस्यमतमनुसृता इति तथापि भासर्वज्ञच्छाया प्रतिभाति इति मन्ये। न्यायभूषणन्यायमञ्जर्यौ इमौ द्वौ अपि ग्रन्थौ न्यायकीर्त्तिस्तम्भौ इति। जयन्तभट्टस्य प्रतिवादिनं प्रति उक्तिः नितान्तं विनोदपूर्णा सती अतितीक्ष्णा सूक्ष्मा मर्मबेधिनी च। विशेषतः चार्वाकार्हतबौद्धमीमासकानां कृते निष्करूणा वज्रपातिनी च। परान् वाक्चातुर्येऽपि न मुञ्चति। सुदृढो नैयायिक सः तत्र नास्ति मनागपि सन्देहः। अत एव ईश्वरीयसत्तामङ्गीकुर्वाणो ब्रूते–

**ये त्वीश्वरं निरपवाददृढप्रमाण-**

**सिद्धस्वरूपमपि नाभ्युपयन्ति मूढाः।**

**पापाप तैः सह कथापि वितन्यमाना**

**जायेत नूनमिति मुक्तमतो विरन्तुम्।।**[15]

**व्रवीति पुनः**

भो भगवन्तः सभ्याः क्वेदं दृष्टं क्व वा श्रुतं लोके यद् वाक्येषु पदानां रचना नैसर्गिकी भवति।

**यदि स्वाभाविकी वेदे पदानां रचना भवेत्।**

**पटे हि हन्त तन्तूनां कथं नैसर्गिकी न सा।।**[16]

क्वचित् कर्तृपूर्वकत्वमपरत्र तद्विपर्ययः इति महान् न्यामोहः। एवं धूमो इपि कश्चिदग्निमान् कश्चिदनग्निकः इत्यपि स्यात्। मीमांसकाः यशो पिवन्तु पयो वा पिवन्तु स्वबुद्धिजाड्यापनयनाय ब्राह्मीघृतं वा पिवन्तु वेदस्तु पुरुषप्रणीतः नास्त्यत्र भ्रान्तिः इति।

अभिनन्देन तत्पुत्रेण कादम्वरीकथासारे सत्यमुक्तम्–

**सरसा सदलङ्कारा: प्रसादमधुरागिरः।**

**कान्ताः तातजयन्तस्य जयन्ति जगतांगुरोः।।**[17]

परमतनिराकरणसमये अयं जरन्नैयामिकः प्रबलतरयुक्त्या परमते दुष्परिहरदोषदानपूर्वकं कीदृशं गर्जति इति एकमुदाहरणं प्रस्तौमि मोक्षविषये सांख्यमतनिराकरणप्रसङ्गे–ननु पुरूषस्य स्वातन्त्रात्मककर्तृत्वे सति स्वकृतकर्मफलोपभोगानन्त्यादनिर्मोक्षः स्यात्। न हि कर्मणां परिक्षयो जन्मकोटिशतैरपि शक्यक्रियः। यत्र तु कर्त्तारमुदासीनं प्रकृतिर्बध्नाति तदा सैव ज्ञाता सती मोक्ष्यतीति न दूरं मोक्षवर्त्म भविष्यति। अतो बत निखिलमेव मौर्ख्यं सांख्यहृदयेष्वेव प्रतिष्ठितमिति कथमन्यो जनः इदानीं मूर्खो भविष्यति।[18] अचेतने हि निरङ्कुशे प्रधाने बन्धयितरि सुतरामनिर्मोक्षः स्यात्।

तत्त्वविदमपि पुमांसं न वध्नाति प्रकृतिरिति कोऽस्या नियन्ता पङ्मवन्धन्यायेन संयोगस्य तदापि तुल्यत्वात् निवृत्तकुतूहलं पुमानिति चेत्, प्रकृतिनिर्मुक्त कौतुकाभिनववधूरिवस्थितैव।

अपि चरे मूढ? पूर्वमेव तपस्विना पुंसा किं कृतं यदसौ बष्ट्टोऽभूत्। द्रद्धत्वं तु तस्य रूपं तदविनाभूतं कैवल्यदशायामपि तन्न नश्यति इत्येवेति तर्थदमपि तद्बन्धनाय कथं न प्रवर्तते निर्मर्यादा प्रकृतिः। दृष्टास्मीति निरमतीति चेत् मैवम् न ह्यसावेकपत्नीव्रतदुर्ग्रहगृहीता, निःसंख्यपुरुषोपभोगसौभाग्या पण्यवनितेव नासौ नियमेन व्यवहर्तुमर्हतीत्यास्तामेतत्। अपि च बुद्धिर्नाम विषयोपलम्भः अहंकारोऽप्यहं प्रत्ययरूपोऽभिमानो बुद्धिविशेष एव। तेन बाह्यानि इन्द्रियाणि जन्यन्ते गन्धादयश्चगुणाः गुणैश्च पृथिव्यादीनि भूतानीति महाव्यामोहः इदञ्च चित्रं विषयजन्याः हि सुखादयः प्रसिद्धास्ते च सुखादिजन्याः विषयाः संवृत्ताः नवेयं विश्वामित्रस्येव सांख्यमुनेः सृष्टिः। न च प्रधानास्तित्वमपि प्रमाणवत् अन्वय्यादिहेतूनामसाधनत्वात्। चेतनानां हि संभवेदपि सुखदुःखमोहान्वितत्वम् चेतनानि भूतानि सुखदुःखमोहवन्तीति सुभाषितम्। घटे पटे शकटे च सुखदुःखमोहाः सन्तीतिकः प्रतिपद्यते। प्रकाशप्रवृत्तिनियमा अपि चेतनेष्वेव दृश्यन्ते नाचेतनेष्वित्यसिद्धत्वाद्धेतोर्न प्रधानसिद्धिः इति सांख्यमतखण्डनं कुशलतया जयन्तेनकृतं।

सन्दर्भग्रन्थाः

1.न्यायभूषणम्, पृ. 98

2.षड्दर्शनसमुच्चयः

3.न्या.भू., पृ. 98

4.न्या.भू., पृ. 163

5.न्या.ली., पृ. 357-358

6.न्या.सू., पृ. 1-3

7.न्या.भू., पृ. 84

8.न्या.भू., पृ. 101

9.न्या.सू. 1-21

10.न्या.सू., पृ. 1-22

11.न्या.सू., पृ. 596

12.न्या.सू., पृ. 595

13.न्या.सू., पृ. 594

14.न्यायकणिका, पृ. 1

15.न्या.म., पृ. 286

16.न्या.म., पृ. 16

17.कादम्बरीकथासारः, पृ. 1

18.न्या.म., पृ. 62